# श्रीनृसिंहाष्टकम्

भोखंडं वारणांडं परवरविरटं डंपडंपोरुडंपं
डिंडिंडिंडिं डिडिंबं दहमपिवहमैर्झुंपझुंपैश्च झुंपैः ।
तुल्यास्तुल्यास्तु तुल्याः धुमधुमधुमकैः कुंकुमांकैः कुमांकैः
एतत्ते पूर्णयुक्तं अहरहकरहः पातु मां नारसिंहः । १ ।

भूभृद्भूभृध्भुजंगं प्रलयरवरवं प्रज्वलद्ज्वालमालं
खर्जर्जं खर्जदुर्जं खखचखचखचित्खर्जदुर्जर्जयंतम् ।
भूभागं भोगभागं गगगगगगनं गर्दमृत्यूग्रगंडं
स्वच्चं पुच्चं स्वगच्चं स्वजनजननुतः पातु मां नारसिंहः । २ ।

एनाग्रं गर्जमानं लघुलघुमकरो बालचंद्रार्कदंष्ट्रो
हेमांभोजं सरोजं जटजटजटिलो जाड्यमानस्तुभीतिः ।
दंतानां बाधमानं खगटखगटवो भोजजानुः सुरेंद्रो
निष्कृत्यूहं स राजा गहगहगहतः पातु मां नारसिंहः । ३ ।

शंखं चक्रं च चापं परशुमशमिषं शूलपाशांकुशास्त्रं
बिभ्रंतं वज्रखेटं हलमुसलगदाकुंतमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
वंदे प्रत्येकरूपं परपदनिवसः पातु मां नारसिंहः । ४ ।

पादद्वंद्वं धरित्रीकटिविपुलतरो मेरुमध्यूढ्वमूरुं
नाभिब्रह्मांडसिंधुः हृदयमपि भवो भूतविद्वत्समेतः ।
दुश्चक्रांकं स्वबाहुं कुलिशनखमुखं चंद्रसूर्याग्निनेत्रं
वक्त्रं वह्नि सुविद्युत्सुरगणविजयः पातु मां नारसिंहः । ५ ।

नासाग्रं पीनगंडं परबलमथनं बद्धकेयूरहारं
रौद्रं दंष्ट्राकरालं अमितगुणगणं कोटिसूर्याग्निनेत्रम् ।
गांभीर्यं पिंगलाक्षं भ्रुकुटितविमुखं षोडशाधार्धबाहुं
वंदे भीमा हासं त्रिभुवनविजयः पातु मां नारसिंहः । ६ ।

के के नृसिंहाष्टके नरवरसदृशं देवभीत्वं गृहीत्वा
देवंद्यो विप्रदंदं प्रतिवचनपयायाम्यनप्रत्यनैषीः ।
शापं चापं खड्गं प्रहसितवदनं चक्रचक्रीचकेन
ओमित्ये दैत्येनादं प्रकचविविदुषां पातु मां नारसिंहः । ७ ।

झुं झुं झुं झुं झुंकारं झुष झुष झुषितं जानुदेशं झुकारं
हुं हुं हुं हुं हुकारं हरितकहहसा यंदिशे वं वकारम् ।
वं वं वं वं वकारं वदनदलिततं वामपक्षं सुपक्षं
लं लं लं लं लकारं लघुवणविजयः पातु मां नारसिंहः । ८ ।

भूतप्रेतपिशाचयक्षगणशः देशांतरोच्चाटना–
चोरव्याधिमहाज्वरं भयहरं शत्रुक्षयं निश्चयम् ।
संध्याकालजपंतमष्टकमिदं सद्भक्तिपूर्वादिभिः
प्रह्लादेव वरो वरस्तु जयिता सत्पूजितां भूतये । ९ ।

॥ इति श्री विजयींद्र यतिकृतं श्रीनृसिंहाष्टकम् ॥